# Ambikatatankah

# अम्बिकाताटङ्कः

## Document Information

Text title : ambikAtATankaH

File name : ambikAtATankaH.itx

Category : devii, devI, jaina

Location : doc_devii

Proofread by : DPD

Latest update : March 30, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 11, 2023

*sanskritdocuments.org*

# अम्बिकाताटङ्कः

सिंहारूढा सुतयुगविभूषिता कम्रनम्रमध्यगता ।
साऽम्बा देवी तीर्थाधिवासिनी हरतु मम दुरितम ॥ १ ॥

ॐ ह्रीं जय जय परमेश्वरि ! श्रीअम्बिके ! आम्रहस्ते ! महासिंहयानस्थिते !
किङ्किर्णानूपुरक्बाणकेयूरहाराङ्गदानेकसद्भूषणैर्विभूषिताङ्गे !
सर्वसल्लक्षणैर्णैर्लक्षिताङ्गे ! जिनेन्द्रस्य भक्ते ! कले ! निष्कले !
निष्प्रपञ्च ! महाग्रानने ! मिद्धगन्धर्वविद्याधरे- न्द्रार्चिते !
मन्त्रमूर्तें ! शिवे ! शङ्करे ! सिद्धिबुद्धिधृतिकीर्तिकान्तिविस्तारिणि !
शान्तिनिधितुष्टिपुष्टिहृष्टिप्रिये ! शोभने ! सुप्रहासे !
जरे ! जम्भिनि ! स्तम्भिनि । ! मोहिनि ! दीपनि ! शोषणि !
त्रासिनि ! मोटिनि ! भञ्जिनि ! दुष्टसञ्चूर्णिनि ! क्षुद्र-
विद्रावणि ! शत्रुसञ्चूर्णिनि ! धार्मिकारक्षिणि ! देवि !
अम्बे ! महाविक्रमे ! भीम- नादे ! सुनादे ! अघोरे ! सुघोरे !
सुरौद्रे ! सुरौद्रानने ! चण्डिके ! चण्डरूपे ! सुनेत्रे ! सुवक्रे !
सुगात्रे ! पवित्रे ! नमन्मध्यभागे ! जयन्ति ! जयन्ताकुमारी !
त्रैपुराङ्गि ! गौरि ! गान्धारि ! गन्धर्वि ! यक्षेश्वरि !
ॐ कालि ! कालि ! महाकालि ! योगेश्वरि ! जनमार्गस्थिते ! सुप्रशस्ते !
धनुर्बाणदण्डासिचक्राम्बुजानेकशस्त्रोदिते ! सृष्टिसंहारकर्त्रि !
दिव्ये ! देन्द्रनागेन्द्रभूपेन्द्रचन्द्रस्तुते ! सुवर्णे ! पवित्रे ! महामूल-
विद्यास्थिते ! वषड्कारस्वाहाकारस्वधाकारह्रीङ्कारकेङ्कारबीजाजान्विते !
दुःखदारिद्र्यदौ- भाग्यनिर्नाशिनि ! लक्ष्मीधृतिकीर्तिकान्तिविस्तारिणि !
ह्रीं नमो यक्षेश्वरि ! ह्रीं देवि ! कुष्माण्डिके ! । हूँ नमो
देवि ! अम्बिके । ह्रः सदा सर्वसिद्धिप्रदे ! अलं रक्ष रक्ष मां
देवि ! वादे विवादे रणे कानने शत्रुमध्ये श्मशाने अग्नौ गिरौ
रात्रौ सन्ध्याकाले विद्रुस्तं निरस्तं नभःस्थे निषण्णं प्रमत्तं
भयैर्व्याघ्रसिंहैर्वराहैश्च रुद्धं तथा व्यालवेतालभूपालभीतं

ज्वरेणाभिभूतं कृतान्तेन नीतं नरेण उक्तं नरैराक्षसैर्दैवि !
अम्बालये ! त्वत्प्रसादात् शान्तिकं पौष्टिकं वश्यमाकर्षणं स्तम्भनं
मोहनं दुष्टसञ्चूर्णनं धार्मिकारक्षणम् ।

इति अम्बिकाताटङ्कः सम्पूर्णः ।

Proofread by DPD

---

*Ambikatatankah*

pdf was typeset on March 11, 2023

Please send corrections to *sanskrit@cheerful.com*